# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री-1** | **सत्रम् – 1** | **गुणाः - 70** |
| **विषयः –** पुराणेतिहासः | **प्रश्नपत्रम् - 6 - CC - 1.1.2** | **समयः- 11:30 तः 2:30** |
| **दिनाङ्कः- 15/10/2019** | **संदर्भग्रन्थः –** वा.रा.सुन्दरकाण्ड: १ त: ३४ सर्गा: | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः सान्वयं व्याख्यां कुरुत। 10**

1. मुखं नासिकया तस्य ताम्रया ताम्रमा बभौ।
   संध्यया समभिस्पृष्टं यथा स्यात् सूर्यमण्डलम् ।।
2. ततः शरीरं संक्षिप्य तन्महीधरसंनिभम्
   पुनः प्रकृतिमापेदे वीतमोह इवात्मवान् ।।
3. रावणस्तवसंयुक्तान् गर्जतो राक्षसानपि।
   राजमार्गं समावृत्य स्थितं रक्षोगणं महत् ।।

**प्र-2 पुष्पकविमानस्य वर्णनम्। 10**

**अथवा**

**लङ्कायाः वर्णनम्।**

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः सान्वयं व्याख्यां कुरुत। 10**

1. सम्पूर्णचन्द्रप्रतिमं पद्मपत्रनिभेक्षणम्।
   रामस्य ध्यायती वक्त्रं पञ्चत्वं कृपणा गता।।
2. संतानकलताभिश्च पादपैरुपशोभिताम्।
   दिव्यगन्धरसोपेतां सर्वतः समलंकृताम् ।।
3. उपवासेन शोकेन ध्यानेन च भयेन च।
   परीक्षीणां कृशां दीना अल्पाहारां तपोधनाम् ।।

**प्र-4 कस्यचिदेकस्य निबन्धं लिखत। 10**

**1. सीतायाः दुःखम् मनोदशा च।**

**2. रावणस्य परिचयः।**

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः सान्वयं व्याख्यां कुरुत। 10**

1. न मानुषी राक्षसस्य भार्या भवितुमर्हति।

कामं स्वादृत मां सर्वा न करिष्यामि वो वचः ।।

2. एवं स्वप्ने मया दृष्टो रामः सत्यपराक्रमः ।।
   लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान् ।।
3. व्यञ्जनानि हि ते यानि लक्षणानि च लक्षये ।
   महिषी भूमिपालस्य राजकन्या च मे मता ।।

**प्र-6 कस्यचिदेकस्योपरि निबन्धं लिखत । 10**

**1. सीतायाः कुरुणविलापः ।**

**अथवा**

**2. श्रीरामवर्णनम् ।**

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-7 दशानां एकवाक्येन उत्तराणि लिखत । 10**

1. वाल्मीकिरामायणे सुन्दरकाण्डे कति सर्गाः
2. आदिकाव्यं किम्
3. वाल्मीकिरामायणस्य रचयिता कः
4. वाल्मीकिरामायणे कति काण्डानि सन्ति
5. सुन्दरकाण्डे प्रथमे सर्गे कति श्लोकाः सन्ति
6. सुन्दरकाण्डे प्रथम सर्गे हनुमान् कस्य वधं करोति
7. लङ्का केन धातुना निर्मिता आसीत्
8. पुष्पकविमानस्य रचयिता क:
9. हनुमान् किमर्थं लङ्कापुरीं गतवान्
10. रामकथायाः वर्णनं क: करोति
11. अशोकवाटिकाया: अपरं नाम किम्
12. हनुमान् सीतां कुत्र पश्यति
13. रावणं दृष्ट्वा सीतायाः अवस्था कीदृशी भवति
14. का नाम राक्षसी सीतायां स्निह्यति
15. रामायणशब्दस्य कोऽर्थ: